योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २७

सप्तविंशः सर्गः २७

श्रीवसिष्ठ उवाच ।

तस्मिंस्तदा वर्तमाने घोरे समरसंभ्रमे ।

देवासुरशरीरेषु गर्तेष्वभ्रोदरेष्विव ।। १

वहत्स्वसृक्प्रवाहेषु गङ्गापूरेष्विवाम्बरात् ।

दाम्नि वेष्टितदेवौघकृतक्ष्वेडाघनारवे ।। २

व्याले निजकराकृष्टिपिष्टसर्वसुरालये ।

कटे कठिनसंरम्भसङ्गरक्षपितामरे ।। ३

ऐरावते क्षीणरवे पलायनपरायणे ।

प्रवृद्धे दानवानीके मध्याह्न इव भास्करे ।। ४

पतिताङ्गव्यथार्तानि प्रस्रवद्रुधिराणि च ।

पयांसीवावसेतूनि देवसैन्यानि दुद्रुवुः ।। ५

दामव्यालकटास्तानि चिरमन्तर्हितानि च ।

अनुजग्मुर्लसन्नादसिन्धनानीव पावकाः ।। ६

अन्विष्टानपि यत्नेन नालभन्तासुराः सुरान् ।

घनजालवनोड्डीनान्सिंहा हरिणकानिव ।। ७

अलब्धेष्वमरौघेषु दामव्यालकटास्तदा ।

जग्मुः पातालकोशस्थं प्रभुं प्रमुदिताशयाः ।। ८

अथ देवा विषण्णास्ते क्षणमाश्वास्य वै ययुः ।

जयोपायाय विजिता ब्रह्माणममितौजसम् ।। ९

तेषामाविरभूद्ब्रह्मा रक्तरक्ताननश्रियाम् ।

सायं रक्तीकृताम्बूनामब्धीनामिव चन्द्रमाः ।। १०
प्रणम्य ते सुरास्तस्मा अनर्थं शम्बरेहितम् ।
सम्यक्प्रकथयामासुर्दामव्यालकटक्रमम् ।। ११
तदाकर्ण्याखिलं ब्रह्मा विचार्य स विचारवित् ।
उवाचेदं सुरानीकमाश्वासनकरं वचः ।। १२
श्रीब्रह्मोवाच ।
शतवर्षसहस्रान्ते शम्बरेण हरेः करात् ।
मर्तव्यं समरेशस्य तत्कालं संप्रतीक्षताम् ।। १३
दामव्यालकटानेतानद्य त्वमरसत्तमाः ।
योधयन्तः पलायध्वं मायायुद्धेन दानवान् ।। १४
युद्धाभ्यासवशादेषां मुकुराणामिवाशये ।
अहंकारचमत्कारः प्रतिबिम्बमुपैष्यति ।। १५
गृहीतवासनास्त्वेते दामव्यालकटाः सुराः ।
सुजेया वो भविष्यन्ति लग्नजालाः खगा इव ।। १६
अद्य त्ववासना ह्येते सुखदुःखविवर्जिताः ।
धैर्येणारीन्विनिघ्नन्तो देवा दुर्जयतां गताः ।। १७
वासनातन्तुबद्धा ये आशापाशवशीकृताः ।
वश्यतां यान्ति ते लोके रज्जुबद्धाः खगा इव ।। १८
ये भिन्नवासना धीराः सर्वत्रासक्तबुद्धयः ।
न हृष्यन्ति न कुप्यन्ति दुर्जयास्ते महाधियः ।। १९
यस्यान्तर्वासनारज्ज्वा ग्रन्थिबन्धः शरीरिणः ।
महानपि बहुज्ञोऽपि स बालेनापि जीयते ।। २०
अयं सोऽहं ममेदं तदित्याकल्पितकल्पनः ।
आपदां पात्रतामेति पयसामिव सागरः ।। २१
इयन्मात्रपरिच्छिन्नो येनात्मा भव्यभावितः ।
स सर्वज्ञोऽपि सर्वत्र परां कृपणतां गतः ।। २२

अनन्तस्याप्रमेयस्य येनेयत्ता प्रकल्पिता ।

आत्मनस्तस्य तेनात्मा स्वात्मनैवावशीकृतः ।। २३

आत्मनो व्यतिरिक्तं यत्किंचिदस्ति जगत्त्रये ।

यत्रोपादेयभावेन बद्धा भवतु वासना ।। २४

आस्थामात्रमनन्तानां दुःखानामाकरं विदुः ।

अनास्थामात्रमभितः सुखानामाकरं विदुः ।। २५

दामव्यालकटा यावदनास्था भवसंस्थितौ ।

तावन्न नाम जेयावो मशकानामिवानलाः ।। २६

अन्तर्वासनया जन्तुर्दीनतामनुयातया ।

जितो भवत्यन्यथा तु मशकोऽप्यमराचलः ।। २७

विद्यते वासना यत्र तत्र सा याति पीनताम् ।

गुणो गुणिनि हि द्वित्वं सतो दृष्टं हि नासतः ।। २८

अयं सोऽहं ममेदं चेत्येवमन्तः सवासनम् ।

यथा दामादयः शक्र भावयन्ति तथा कुरु ।। २९

या या जनस्य विपदो भावाभावदशाश्च याः ।

तृष्णाकरञ्जवल्ल्यास्ता मञ्जर्यः कटुकोमलाः ।। ३०

वासनातन्तुबद्धो यो लोको विपरिवर्तते ।

सा प्रवृद्धातिदुःखाय सुखायोच्छेदमागता ।। ३१

धीरोऽप्यतिबहुज्ञोऽपि कुलजोऽपि महानपि ।

तृष्णया बध्यते जन्तुः सिंहः शृङ्खलया यथा ।। ३२

देहपादपसंस्थस्य हृदयालयगामिनः ।

तृष्णा चित्तखगस्येयं वागुरा परिकल्पिता ।। ३३

दीनो वासनया लोकः कृतान्तेनापकृष्यते ।

रज्ज्वेव बालेन खगो विवशो भृशमुच्छवसन् ।। ३४

अलमायुधभारेण संगरभ्रमणेन च ।

वासनाया विपर्यासं युक्त्या यत्नाद्रिपोः कुरु ।। ३५

अन्तरा क्षुभिते धैर्ये रिपोरमरनायक ।

न शस्त्राणि न चास्त्राणि न शास्त्राणि जयन्ति च ।।३६

दामव्यालकटास्त्वेते युद्धाभ्यासवशेन च ।

अहंकारमयीं मत्तास्ते ग्रहीष्यन्ति वासनाम् ।। ३७

यदा तेऽत्यज्ञपुरुषाः शम्बरेण विनिर्मिताः ।

वासनामाश्रयिष्यन्ति तदा यास्यन्ति जेयताम् ।।३८

तत्तावद्युक्तियुद्धेन तान्प्रबोधयतामराः ।

यावदभ्यासवशतो भविष्यन्ति सवासनाः ।। ३९

ततो वश्या भविष्यन्ति भवतां बद्धवासनाः ।

तृष्णाऽप्रोताशया लोके न च केचन पेलवाः ।। ४०

समविषममिदं जगत्समग्रं

समुपनतं स्थिरतां स्ववासनान्तः ।

चलचललहरीभरो यथाब्धा-

वत इह सैव चिकित्स्यतां प्रयाता ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे पितामहवाक्यं नाम सप्तविंशः सर्गः ।। २७ ।।